रत्नमा० । ७मल्लिकायां ८सूक्ष्मैलायां ९त्रिवृति (तेओड़ि) च स्त्री मेदि० । १०कर्णस्फोटलतायां ११स्थूलैलायां १२रक्तत्रिवृति च स्त्री राजनि० । १३देवीभेदे च स्त्री "ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः । त्रिपुटाख्या द्विरुक्तैस्तैर्वीजैरङ्गानि षट् क्रमात्" तन्त्रसा०तस्याध्यानादिकं तत्रैव दृश्यम् १४त्रिवृति एरण्डे वा ङीप् । त्रयाणां पुटानां समाहारः । १५ पुटत्रये स्त्री ङीप् । त्रीणि पुटानि यस्य कप् ।१६व्रणाकारभेदे "तत्रायश्चतुरस्रो वृत्तस्त्रिपुटक इति सर्वव्रणसमासः" सुश्रुतः । त्रिपुट+स्वार्थे क संज्ञायां कन् वा । त्रिवृति वैदले "मुद्गवनमुद्गकलायमकुष्ठमसूरमङ्गल्यचणकसतीनत्रिपुटकहरेणवाढ़कीप्रभृतयो वैदलाः" सुश्रु० ।

**त्रिपुटिन्** पु०त्रीणि पुटानि सन्त्यस्य इनि । एरण्डवृक्षे शब्दमा०

**त्रिपुटी** स्त्री त्रीणि पुटानि सन्त्यस्याः अच् गौरा० ङीष् । त्रिवृति भरतः ।

**त्रिपुटीफल** पु० त्रिपुटी पुटत्रयं फलेऽस्य । एरण्डवृक्षे हारा०

**त्रिपुण्ड्र** न०त्रयाणां पुण्ड्राणां इक्षुवदाकाराणां समाहारः । १ललाटस्थे तिर्य्यग् रेखात्रयात्मके, "वक्राः ललाटगास्तिस्रो भस्मरेखास्त्रिपुण्ड्रकम्" इत्युक्ते तिलकभेदे "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया । पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः। तस्मान्मृदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम्"ति०त० ब्रह्माण्डपुराणम् ।"ऊर्द्ध्वपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा । तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया । ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियस्य त्रिपुण्ड्रकम् । अर्द्धचन्द्रञ्च वैश्यस्य वर्त्तुलं शूद्रयोनिजः" आ० त० । "शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् । विष्ण्वागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत्" इति नागोजीभट्टधृतस्मृतसंहिता "मृत्स्नया भस्मना वापि त्रिपुण्ड्रं विन्दुसंयुतम् । ललाटे तिलकं कुर्य्याद्गायत्र्याबद्धकुन्तलः" इति महानिर्वाणतन्त्रम् "येषां वपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम् । श्मशानसदृशं तत् स्यान्न प्रेक्ष्यं पुण्यकृज्जनैरिति" देवीभाग० । अपि च तत्रैव नारदं प्रति नारायणवाक्यम् "त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते । धारयन्ति च ये भक्त्या धारयन्ति तमेव ते । तिर्य्यग्रेखाः प्रदृश्यन्ते ललाटे सर्वदेहिनाम् । तथापि मानवा मूर्खा न कुर्वन्ति त्रिपुण्ड्रकमिति" ।

**त्रिपुर्** स्त्री त्रिगुणिताः पुरः समासान्तविधेरनित्यत्वात् आर्षे न अच् समा० । पुराणां त्रये त्रिपुरशब्दे च पुरत्रयं दृश्यम् । "ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप !" भाग० ७।१०।५४ ।

**त्रिपुर** न० त्रयाणां पुराणां समाहारः । असुराणां १पुरत्रये । तत्पुरकथा भा० क० प० ३३ अ० । "ततस्ते सहिता राजन् ! संप्रधार्य्यासकृद्बहु । सर्वलोकेश्वरं वाक्यं प्रणम्येदमथाब्रुवन् । अस्माकं त्वं वरं देव ! प्रयच्छेमं पितामह ! । वयं पुराणि त्रीण्येव समास्थाय महीमिमाम् । विचरिष्याम लोकेऽस्मिंस्त्वत्प्रसादपुरस्कृताः। ततो वर्षसहस्रे तु समेष्यामः परस्परम् । एकीभावं गमिष्यन्ति पुराण्येतानि चानघ । समागतानि चैकत्वं यो हन्याद्भगवंस्तदा । एकेषुणा देववरः स नो मृत्युर्भविष्यति । एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवम् । ते तु लब्धवराः प्रीताः संप्रधार्य्य परस्परम् । पुरत्रयविसृष्ट्यर्थं मयं वव्रुर्महासुरम् । विश्वकर्म्माणमजरं दैत्यदानवपूजितम् । ततो मयः स्वतपसा चक्रे धीमान् पुराणि च । त्रीणि काञ्चनमेकं वै रौप्यं कार्ष्णायसं तथा । काञ्चनं दिवि तत्रासीदन्तरीक्षे च राजतम् । आयसञ्चाभवद्भौमं चक्रस्थं पृथिवीपते ! । एकैकं योजनशतं विस्तारायामसम्मितम् । गृहाट्टालकसंयुक्तं वृहत्प्राकारतोरणम् । गृहप्रवरसंबाधमसम्बाधमहापथम् । प्रासादैर्विविधैश्चैव द्वारैश्चाप्युपशोभितम् । पुरेषु चाभवन् राजन् ! राजानो वै पृथक् पृथक् । काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः । राजतं कमलाक्षस्य विद्युन्मालिन आयसम् । त्रयस्ते दैत्यराजानस्त्रीँल्लोँकानाशु तेजसा । आक्रम्य तस्थुर्वचुश्च कश्च नाम प्रजापतिः । तेषां दानवमुख्यानां प्रयुतान्यर्बुदानि च । कोट्यश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः । मांसादाश्च सुदृप्ताश्च सुरैर्विनिकृताः पुरा । महदैश्वर्य्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः । सर्वेषाञ्च पुनस्तेषां सर्वयोगवहो मयः । तमाश्रित्य हि ते सर्वे वर्त्तयन्त्यकुतोभयाः । यो हि यं मनसा कामं दध्यात् त्रिपुरसंश्रयः । तस्मै कामं मयस्तं तं विदधे मायया तदा । तारकाक्षसुतो वीरो हरिर्नाम महाबलः । तपस्तेपे परमकं येनातुष्यत् पितामहः । सन्तुष्टमवृणोद्देवं वापी भवतु नः पुरे । शस्त्रैर्विनिहता यत्र क्षिप्ताः स्युर्बलवत्तराः । स तु लब्ध्वा वरं वीरस्तारकाक्षसुतो हरिः । ससृजे